# माँ बगलामुखी हृदय स्तोत्र

इदानीं खलु मे देव। बगला-हृदयं प्रभो।

कथयस्व महा-देव। यद्यहं तव वल्लभा ।।1।।

श्री ईश्वरो वाच

साधु साधु महा-प्राज्ञे।सर्व-तन्त्रार्थ-साधिके।

ब्रह्मास्त्र-देवतायाश्च, हृदयं वच्मि तत्त्वतः ।।2।।

हृदय–स्तोत्रम्ग

गम्भीरां च मदोन्मत्तां, स्वर्ण-कान्ति-सम-प्रभाम् ।

चतुर्भुजां त्रि-नयनां, कमलासन-संस्थिताम् ।।1।।

ऊर्ध्व-केश-जटा-जूटां, कराल-वदनाम्बुजाम् ।

मुद्गरं दक्षिणे हस्ते, पाशं वामेन धारिणीम् ।।2।।

रिपोर्जिह्वां त्रिशूलं च, पीत-गन्धानुलेपनाम् ।

पीताम्बर-धरां सान्द्र-दृढ़-पीन-पयोधराम् ।।3।।

हेम-कुण्डल-भूषां च, पीत-चन्द्रार्ध-शेखराम् ।

पीत-भूषण-भूषाढ्यां, स्वर्ण-सिंहासने स्थिताम् ।।4।।

स्वानन्दानु-मयी देवी, सिपु-स्तम्भन-कारिणी ।

मदनस्य रतेश्चापि, प्रीति-स्तम्भन-कारिणी ।।5।।

महा-विद्या महा-माया, महा-मेधा महा-शिवा ।
महा-मोहा महा-सूक्ष्मा, साधकस्य वर-प्रदा ।।6।।

राजसी सात्त्विकी सत्या, तामसी तैजसी स्मृता ।
तस्याः स्मरण-मात्रेण, त्रैलोक्यं स्तम्भयेत् क्षणात् ।।7।।

गणेशो वटुकश्चैव, योगिन्यः क्षेत्र-पालकः ।
गुरवश्च गुणास्तिस्त्रो, बगला स्तम्भिनी तथा ।।8।।

जृम्भिणी मोदिनी चाम्बा, बालिका भूधरा तथा ।
कलुषा करुणा धात्री, काल-कर्षिणिका परा ।।9।।

भ्रामरी मन्द-गमना, भगस्था चैव भासिका ।
ब्राह्मी माहेश्वरी चैव, कौमारी वैष्णवी रमा ।।10।।

वाराही च तथेन्द्राणी, चामुण्डा भैरवाष्टकम् ।
सुभगा प्रथमा प्रोक्ता, द्वितीया भग-मालिनी ।।11।।

भग-वाहा तृतीया तु, भग-सिद्धाऽब्धि-मध्यगा ।

भगस्य पातिनी पश्चात्, भग-मालिनी षष्ठिका ।।12।।

उड्डीयान-पीठ-निलया, जालन्धर-पीठ-संस्थिता ।
काम-रुपं तथा संस्था, देवी-त्रितयमेव च ।।13।।

सिद्धौघा मानवौघाश्च, दिव्यौघा गुरवः क्रमात् ।
क्रोधिनी जृम्भिणी चैव, देव्याश्चोभय पार्श्वयोः ।।14।।

पूज्यास्त्रिपुर-नाथश्च, योनि-मध्येऽम्बिका-युतः ।
स्तम्भिनी या मह-विद्या, सत्यं सत्यं वरानने ।।15।।

।। फल–श्रुति ।।

एषा सा वैष्णवी माया, विद्यां यत्नेन गोपयेत् ।
ब्रह्मास्त्र-देवतायाश्च, हृदयं परि-कीर्तितम् ।।1।।

ब्रह्मास्त्रं त्रिषु लोकेषु, दुष्प्राप्यं त्रिदशैरपि ।
गोपनीयं प्रत्यनेन, न देयं यस्य कस्यचित् ।।2।।

गुरु-भक्ताय दातव्यं, वत्सरं दुःखिताय वै ।
मातु-पितृ-रतो यस्तु, सर्व-ज्ञान-परायणः ।।3।।

तस्मै देयमिदं देवि ! बगला-हृदयं परम् ।

सर्वार्थ-साधकं दिव्यं, पठनाद् भोग-मोक्षदम् ।।4।।